# વિન્ધ્યેશ્વરીસ્તોત્રમ્

vindhyeshvarIstotram

sanskritdocuments.org

October 5, 2018

# vindhyeshvarIstotram

# વિન્ધ્યેશ્વરીસ્તોત્રમ્

## Sanskrit Document Information

Text title : vindhyeshvarIstotram

File name : vindhyeshvarIstotra.itx

Category : devii, pArvatI, stotra, devI

Location : doc_devii

Author : Traditional

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : June 15, 2004, October 5, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

October 5, 2018

*sanskritdocuments.org*

# વિન્ધ્યેશ્વરીસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
નિશુમ્ભશુમ્ભમર્દિનીં પ્રચણ્ડમુણ્ડખણ્ડનીમ્ ।
વને રણે પ્રકાશિનીં ભજામિ વિન્ધ્યવાસિનીમ્ ॥ ૧॥

ત્રિશૂલમુણ્ડધારિણીં ધરાવિઘાતહારિણીમ્ ।
ગૃહે ગૃહે નિવાસિનીં ભજામિ વિન્ધ્યવાસિનીમ્ ॥ ૨॥

દરિદ્રદુઃખહારિણીં સતાં વિભૂતિકારિણીમ્ ।
વિયોગશોકહારિણીં ભજામિ વિન્ધ્યવાસિનીમ્ ॥ ૩॥

લસત્સુલોલલોચનાં લતાસદેવરપ્રદામ્ । var જને સદા વરપ્રદામ્
કપાલશૂલધારિણીં ભજામિ વિન્ધ્યવાસિનીમ્ ॥ ૪॥

કરો મુદા ગદાધરો શિવાં શિવપ્રદાયિનીમ્ । var કરાબ્જદાનદાધરાં
વરાવરાનનાં શુભાં ભજામિ વિન્ધ્યવાસિનીમ્ ॥ ૫॥

ઋષીન્દ્રજામિનિપ્રદાં ત્રિધાસ્યરૂપધારિણીમ્ । var કપીન્દ્રજામિનિપ્રદાં ત્રિધાસ્વરૂપ
જલે સ્થલે નિવાસિનીં ભજામિ વિન્ધ્યવાસિનીમ્ ॥ ૬॥

વિશિષ્ટસૃષ્ટિકારિણીં વિશાલરૂપધારિણીમ્ ।
મહોદરે વિશાલિનીં ભજામિ વિન્ધ્યવાસિનીમ્ ॥ ૭॥

પુરન્દરાદિસેવિતાં મુરાદિવંશખણ્ડનીમ્ । var સુરારિવંશખણ્ડિતામ્
વિશુદ્ધબુદ્ધિકારિણીં ભજામિ વિન્ધ્યવાસિનીમ્ ॥ ૮॥

॥ ઇતિ વિન્ધ્યેશ્વરીસ્તોત્રં સમ્પૂર્ણમ્ ॥

var indicates variation or pAThabheda.

Proofread by : Ravin Bhalekar ravibhalekar@hotmail.com

*vindhyeshvarIstotram*

pdf was typeset on October 5, 2018

Please send corrections to *sanskrit@cheerful.com*